# Devadibhih Kritam Vishnu Stotram

# દેવાદિભિઃ કૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Devadibhih Kritam Vishnu Stotram

File name : devAdibhiHkRRitaMviShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 325/73-100||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# દેવાદિભિઃ કૃતં વિષ્ણુસ્તોત્રમ્

તુષ્ટુવુસ્તે હરિં લક્ષ્મીનારાયણં પ્રજેશ્વરાઃ ।
સુરરક્ષક શાન્તાત્મન્ દૈત્યનાશક તે નમઃ ॥ ૭૩॥

મત્સ્યાત્મને ચ તે વિષ્ણો વેદાન્નીતવતે નમઃ ।
અમૃતમન્થનેઽદ્રિં બિભ્રતે કૂર્માય તે નમઃ ॥ ૭૪॥

પૃથ્વીં દન્તે બિભ્રતે તે વરાહાય નમો નમઃ ।
બલિં છલાયતે વિપ્રવામનાય ચ તે નમઃ ॥ ૭૫॥

નમઃ પરશુરામાય કાપથક્ષત્રનાશિને ।
રાવણાન્તકરાયાઽઽશુ રામચન્દ્રાય તે નમઃ ॥ ૭૬॥

કૃષ્ણનારાયણરાધારમાશ્રીપતયે નમઃ ।
નમો બુદ્ધસ્વરૂપાય દૈત્યમોહકરાય તે ॥ ૭૭॥

નમઃ કપિલરૂપાય તત્ત્વજ્ઞાનપ્રદાય તે ।
નમો હંસસ્વરૂપાય વિધાત્રે જ્ઞાનદાય તે ॥ ૭૮॥

વેદવ્યાસસ્વરૂપાય વિદ્યાશ્રવાય તે નમઃ ।
કલિદોષવિનાશકૃત્કલ્કિરૂપાય તે નમઃ ॥ ૭૯॥

પાર્વત્યાશ્ચ પ્રભાયાશ્ચ માણિક્યાઃ પતયે નમઃ ।
કમ્ભરાયાઃ સુપુત્રાય ગોપાલસૂનવે નમઃ ॥ ૮૦॥

શરણ્યાય સુરરક્ષાકર્ત્રે વિદ્યાવતે નમઃ ।
સાધુરૂપાય કૃષ્ણાય વલ્લભાય ચ તે નમઃ ॥ ૮૧॥

જ્ઞાનાચાર્યાય દૈવાય દાસત્રાત્રે ચ તે નમઃ ।
દૈત્યદુઃખિતભક્તાદિરક્ષકાય નમો નમઃ ॥ ૮૨॥

સર્વનેત્રાય હૃત્સ્થાય રમાનાથાય તે નમઃ ।
ધ્વજપદ્માઙ્કુશવજ્રયવચિહ્નવતે નમઃ ॥ ૮૩॥

સ્વસ્તિકજામ્બ્વષ્ટકોણોર્ધ્વરેખાધારિણે નમઃ ।
ધનુસ્ત્રિકોણકલશાઽર્ધચન્દ્રધારિણે નમઃ ॥ ૮૪॥

ગોષ્પદવ્યોમમત્સ્યાદિધારિણે પત્તલે નમઃ ।
દક્ષપાણૌ ધ્વજચક્રધનુસ્ત્રિશૂલસ્વસ્તિકાઃ ॥ ૮૫॥

મીનદણ્ડયવરેખા યસ્ય તસ્મૈ નમો નમઃ ।
બાહૂ નેત્રે જાનુની ચ નાસિકા ચ સ્તનાન્તરમ્ ॥ ૮૬॥

દીર્ઘાણિ સન્તિ તે પઞ્ચ તસ્મૈ કૃષ્ણાય તે નમઃ ।
સુહૃસ્વજઘનપૃષ્ઠગ્રીવાજઙ્ઘાવતે નમઃ ॥ ૮૭॥

સૂક્ષ્મકેશાઙ્ગુલિપર્વરદાઽસ્થિધારિણે નમઃ ।
કક્ષા કુક્ષિશ્ચ વક્ષશ્ચ ઘ્રાણં સ્કન્ધો લલાટકમ્ ॥ ૮૮॥

યસ્યોન્નતાનિ ષટ્ સન્તિ તસ્મૈ શ્રીહરયે નમઃ ।
નેત્રપ્રાન્તૌ નખાસ્તાલુ જિહ્વોષ્ઠૌ પાદયોસ્તલે ॥ ૮૯॥

પાણિતલે ચ રક્તાનિ યસ્ય સન્તિ ચ તે નમઃ ।
ઉરઃ શિરો લલાટં ચ યસ્ય તતાનિ તે નમઃ ॥ ૯૦॥

સ્વરઃ સત્ત્વં ચ નાભિશ્ચ ગમ્ભીરં યસ્ય તે નમઃ ।
વામસક્થ્નિ રમાચિહ્નં યસ્યાસ્તિ તે નમો નમઃ ॥ ૯૧॥

હૃદયે દક્ષિણાવર્તવતે કૃષ્ણાય તે નમઃ ।
સત્રિવલયશોભાઢ્યનાભિયુક્તાય તે નમઃ ॥ ૯૨॥

શીતભાસ્વરરૂપાયાઽમૃતપ્રદાય તે નમઃ ।
અક્ષરાયાઽવ્યાકૃતનામ્ને ગોલોકાય તે નમઃ ॥ ૯૩॥

વૈકુણ્ઠાય બદ્રીશાય શ્વેતદ્વીપાય તે નમઃ ।
ક્ષીરસ્થાનાય જીવાય જીવાતવે ચ તે નમઃ ॥ ૯૪॥

આત્મને ચ તદાત્મને સર્વાત્મને નમો નમઃ ।
વહ્નિસ્થાય રવિસ્થાય હિરણ્યસ્થાય તે નમઃ ॥ ૯૫॥

સુરાઽસુરનિવાસાય ભક્તાર્તિહારિણે નમઃ ।
અપક્ષાય વિપક્ષાય ભક્તપક્ષાય તે નમઃ ॥ ૯૬॥

ભગવઁસ્તે કથાધામ્ને વાર્તાધામ્ને ચ તે નમઃ ।
સર્વવિદ્યાનિવાસાય બ્રહ્મણે તે નમો નમઃ ॥ ૯૭॥

ભગવન્ દેવદેવેશ પાહિ નઃ શરણાગતાન્ ।
જલન્ધરેણ વૈ સ્વર્ગં નિરાકૃત્ય સુરાઁસ્તતઃ ॥ ૯૮॥

સ્વાયત્તીકૃતમેવેતિ કથં ત્વં સહસે પ્રભો ।
સૂર્યશ્ચન્દ્રશ્ચ વહ્નિશ્ચ શેષો ધર્મો નિરાકૃતાઃ ॥ ૯૯॥

શરણં તે વયં પ્રાપ્તા વધસ્તસ્ય વિચિન્ત્યતામ્ ।
વયં ક્ષુદ્રા ઇવ નાથ વિચરામોઽટવીસ્થલમ્ ॥ ૧૦૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૩૨૫-અધ્યાયાન્તર્ગતં
દેવાદિભિઃ કૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૩૨૫/૭૩-૧૦૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 325/73-100..

Proofread by PSA Easwaran

---

*Devadibhih Kritam Vishnu Stotram*
pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*